नयनी, स्त्री, (नीयतेऽनयेति । नी + करणे ल्युट् + ङीप् ।) कनीनी । इति शब्दचन्द्रिका ॥

नयनोत्सवः, पुं, (नयनयोरुत्सवो यस्मात् ।) प्रदीपः । इति शब्दरत्नावली ॥ चक्षुरुत्सवश्च ॥

नयनोपान्तः, पुं, (नयनयोरुपान्तः प्रान्तभागः ।) अपाङ्गः । इति राजनिर्घण्टः ॥

नयनौषधं, क्ली, (नयनयोरौषधम् ।) पुष्पकासीसम् । इति हेमचन्द्रः । ४ । १२३ ॥

नयपीठी, स्त्री, (नयस्य पीठीव ।) अष्टकाङ्गम् । इति त्रिकाण्डशेषः ॥ छक इति भाषा ॥

नयविशारदः, पुं, (नये नीतौ विशारदो विज्ञः ।) नीतिशास्त्रज्ञः । यथा,—
"षाड्गुण्यविधितत्त्वज्ञो देशभाषाविशारदः ।
सान्धिविग्रहिकः कार्य्यो राज्ञा नयविशारदः ॥"
इति मात्स्ये ८६ अध्यायः ॥

नरं, क्ली, (नृणाति प्रापयति आनन्दमिति । नॄ प्रापणे + अच् ।) रामकर्पूरतृणम् । इति मेदिनी । रे, ५२ ॥

नरः, पुं, (नृणातीति । नॄ + अच् ।) मनुष्यः । इत्यमरः । २ । ६ । १ ॥ (यथा, मनुः । १ । ९६ ।
"बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥")
पुरुषः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । ५ । २ । १४ ।
"यदा कदापि दैत्येन्द्र ! नार्य्यास्ते मरणं ध्रुवम् ।
न नरेभ्यो महाभाग ! म्रतिस्ते महिषासुर ! ॥")
विष्णुः । (महादेवः । यथा, महाभारते । १३ । १७ । ११५ ।
"गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः ॥")
अर्ज्जुनः । इति मेदिनी । रे, ५२ ॥ (नरमुनेरंशजातत्वादस्य तथात्वम् ॥) शङ्कुः । इति लीलावती ॥ * ॥ अथ नरजन्मकारणम् । "पितुः शुक्रोत्तरो नरः ॥" अन्यच्च । सुखबोधे ।
"विषमायां तिथौ चेत्तं कुर्य्याद्वौजन्तु कन्यकाम् ।
समायां पुरुषं नूनं केचिदाहुर्म्मनीषिणः ॥
चतुरशीतिलक्षान्ते गोजन्मा ततपरं नरः ।
ततस्तु ब्राह्मणश्च स्यादभयं नात्र संशयः ॥"
इति पाद्मोत्तरखण्डे १५ अध्यायः ॥
(स्वनामख्यातो हरेरंशभूतो धर्म्मपुत्त्रः ऋषिः । यथा, देवीभागवते । ४ । ५ । १५ ।
"हरेरंशौ स्थितौ तत्र नरनारायणावृषी ।
पूर्णं वर्षसहस्रन्तु चक्राते तप उत्तमम् ॥"
अस्य विवरणन्तु तत्रैव विशेषतो द्रष्टव्यम् ॥ * ॥
देवयोनिविशेषः । यथा, विष्णुपुराणे । १ । ५ । ५८ ।
"नरकिन्नररक्षांसि वयःपशुमृगोरगान् ॥")

नरकः, पुं, (नृणाति क्लेशं प्रापयतीति । नॄ + "कृञादिभ्यः संज्ञायां वुन् ।" उणां । ५ । ३५ । इति वुन् ।) दैत्यविशेषः । इत्युणादिकोषः ॥ (नरस्य मनुष्यस्य कं शिरो यत्र ।) दैत्यविशेषः । स पृथिव्या गर्भे वराहदेवाज्जातः । यथा,—
"रजस्वलायां गोत्रायां गर्भे वीर्य्येण योजितः ।
यतो जातस्ततो भूतो देवपुत्त्रोऽपि सोऽसुरः ॥"
तस्य नामकारणं यथा,—
"मानुषस्य शिरस्तत्र स्थितस्य प्राप्य बालकः ।
स्वशिरस्तत्र विन्यस्य रुदंस्तस्थौ चणं तदा ॥
नरस्य शीर्षे स्वशिरो निधाय स्थितवान् यतः ।
तस्मात्तस्य मुनिश्रेष्ठो नरकं नाम वै व्यधात् ॥"
तस्य राज्यं यथा,—
श्रीभगवानुवाच ।
"करतोया सत्यगङ्गा पूर्व्वभागावधिश्रिता ।
यावल्ललितकान्तास्ति तावद्देशं पुरं तदा ॥
अत्र देवी महामाया योगनिद्रा जगत्प्रसूः ।
कामाख्यारूपमादाय सदा तिष्ठति शोभना ॥
अत्रास्ति नदराजोऽयं लौहित्यो ब्रह्मणः सुतः ।
अत्रैव दशदिक्पालाः स्वे स्वे पीठे व्यवस्थिताः ॥
अत्र स्वयं महादेवो ब्रह्मा चाहञ्च सर्व्वदा ।
चन्द्रः सूर्य्यश्च सततं वसतेऽत्रैव पुत्रक ! ॥
सर्व्वे क्रीडार्थमायाता रहस्यं देशमुत्तमम् ।
अत्र श्रीः सर्व्वतोभद्रा भोग्यमत्र सदा बहु ॥
अत्रैव हि स्थितो ब्रह्मा प्राङ्नक्षत्रं ससर्ज्ज ह ।
ततः प्राग्ज्योतिषाख्येयं पुरी शक्रपुरीसमा ॥
अत्र त्वं वस भद्रन्ते ह्यभिषिक्तो मया स्वयम् ।
क्षतदारः सहामात्यै राजा भूत्वा महाबल ! ॥"
तस्य महिषी माया यथा,—
"ततो विदर्भराजस्य पुत्त्रीं मायाह्वयां हरिः ।
पुत्त्रार्थे वरयामास नरकस्य समां गुणैः ॥
तामुद्वाह्य हृषीकेशस्तस्मिन् पुरवरे स्वयम् ।
तया समं स्वतनयं राजत्वेनाभ्यषेचयत् ॥"
तस्य पुत्त्रा यथा,—
"ऋतुमत्याञ्च जायायां कालेन नरकः क्रमात् ।
भगदत्तं महाशीर्षं मदवन्तं सुमालिनम् ॥
चतुरो जनयामास पुत्त्रांस्तांश्च चितिः सुतः ।
महासत्त्वान् महावीर्य्यान् देवैरन्यैर्दुरासदान् ॥"
इति कालीपुराणे ३९ अध्यायः ॥
पापिनां यातनास्थानम् । तत्सङ्ख्या यथा,—
"पातालानाञ्च सप्तानां लोकानाञ्च यदन्तरम् ।
सुचिरं तानि कथ्यन्ते भुवनानि चतुर्द्दश ॥
अष्टाविंशति विख्यातास्ततो नरककोटयः ।
नरकाणामधस्तात्तु धूमः कालाग्निसम्भवः ॥
तस्याधस्तादनन्ताख्यो रुद्रः सर्व्वमयो महान् ।
तदधो धर्म्मचक्रन्तु येनेदं धार्य्यते जगत् ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
तत्पर्य्यायः । नारकः २ निरयः ३ दुर्गतिः ४ । इत्यमरः । १ । ९ । १ ॥ * ॥ नरकसंख्या यथा,—
"उष्णोर्द्धे नरकाः शक्र ! कोटाः पञ्चाशमात्रतः ।
चत्वारिंशच्छतं तेषां प्रधानं तन्निबोधत ॥"
उष्णोर्द्धे पाताले कालाग्निरुद्रस्य पुरोर्द्धे ।
"अवीचिः क्रमिभक्षश्च तथा वैतरणी महान् ।
कूटशाल्मलिरुच्छ्वासयुग्मपर्व्वतरौरवम् ॥
निरुच्छ्वासः पूतिमांसस्तप्तलाचाश्रितं जलम् ।
क्रकच्छेदस्तथा पङ्कं कषायसतापितम् ॥
पूतिपूर्णस्तथा मेदस्तम्भश्च रुधिरं वसा ।
तामिस्रस्वपतुण्डश्च तीक्ष्णाशिश्च नपुंसकः ।
लौहतप्तस्त्रियो भीमा अङ्गारराशिकोपरि ।
कुम्भीपाकः क्षुरस्थेयः सञ्जीवनसुतापनम् ॥
कालसूत्रं महापङ्कं शीतोष्णं चुरमेव च ।
अम्बरीषं तथा घोरं महारौरवसंज्ञकः ॥
सूचीमुखेक्षुयन्त्रश्च तैलं तप्तचणुस्तथा ।
असिपत्रं तथा शाल्वं भूमिर्वामयष्टारिका ॥"
इति देवीपुराणम् ॥
नरकागामिनो यथा,—
यम उवाच ।
"न गच्छन्ति नरा घोरान् बहवोऽधर्म्मनिर्म्मितान् ।
वर्षाश्च सुबहूंस्तत्र प्राप्नुवन्ति तपोधन ! ॥
विस्तरेण तु तत् सर्व्वं ब्रवीमि मुनिसत्तम ! ।
श्रूयतां तन्महाभाग ! श्रुत्वा चैवोपधारय ॥
नाग्निचिन्नरकं याति न सत्पुत्त्री न भूमिदः ।
शूरश्च शतवर्षी च वेदानाञ्चैव पारगः ॥
पतिव्रता न गच्छन्ति सत्यवाक्याश्च ये नराः ।
अजिताश्चाशठाश्चैव स्वामिभक्ताश्च ये नराः ॥
तिलं गाश्च हिरण्यञ्च पृथिवीञ्चापि शाश्वतीम् ।
ब्राह्मणेभ्यः प्रयच्छन्ति न गच्छन्ति न संशयः ॥
स्वदारनिरता दान्ताः परदारविवर्ज्जकाः ।
सर्व्वभूतात्मभूताश्च सर्व्वभूतानुकम्पकः ॥
न गच्छन्ति तु तं देशं पापिष्ठं तमसावृतम् ।
यातनास्थानसंपूर्णं हाहाप्रतिभयस्वनम् ॥
ज्ञानवन्तो द्विजा ये च ये च विद्यापरं गताः ।
उदासीना न गच्छन्ति स्वाम्यर्थे च हता नराः ॥
न गच्छन्त्यत्र दातारः सर्व्वभूतहिते रताः ।
शुश्रूषका मातृपित्रोर्न गच्छन्ति न संशयः ॥
अहिंसका न गच्छन्ति ब्रह्मचर्य्यव्यवस्थिताः ।
पतिव्रता दानवन्तो द्विजभक्ताश्च ये नराः ॥
यथोक्तं यजमानाश्च सत्रयाजिन एव च ।
चातुर्म्मास्यकरा ये च ये द्विजा आहिताग्नयः
गुरुचित्तानुपालाश्च क्रतिनो मौनयन्त्रिताः ।
नित्यस्वाध्यायिनो दान्ताः सदा सन्ध्याश्च ये नराः ।
मानवान् पूजयन्तो वै आत्मभावेन भाविताः ।
अपर्व्वमैथुना ये च न गच्छन्ति द्विजोत्तमाः ॥
ब्राह्मणा अमरत्वञ्च प्राप्नुवन्ति न संशयः ॥
निराशाः सर्व्वकामेभ्यो निराशाः सुजितेन्द्रियाः ।
न गच्छन्ति हि तं घोरं यत्र ते पापकर्म्मिणः ॥"
इति वराहपुराणम् ॥ * ॥
नरकगामिनो यथा,—
नारद उवाच ।
"दुष्कर्म्माण्यपि वक्ष्यामि नरकं यैः प्रयान्ति हि ।
सर्व्वेष्वेव तु कार्य्येषु देवपूर्व्वेषु भूमिप ! ॥
हन्ति पुत्त्रान् पशून् क्षत्रान् ब्राह्मणातिक्रमः स्मृतः ।
गुर्व्वर्थं वा भयार्त्तं वा वर्ज्जयित्वा महीपते ! ।
येऽनृतं कथयन्ति स्म ते वै निरयगामिनः ॥
प्रपाणाञ्च सभानाञ्च संक्रमाणाञ्च मारिष ।
आगाराणाञ्च भेत्तारो नरा निरयगामिनः ॥
ये परस्वापहर्त्तारः परस्वानाञ्च नाशकाः ।
सूचकाश्च परेषां हि ते नरा नरकानुगाः ॥
सूचकाः सन्धिभेत्तारः परवृत्त्युपजीविनः ।